# CBSE Class 12 Sanskrit Core 2020 - Set-4 (22)

## Question Paper

Conducted by the Central Board of Secondary Education (CBSE)

**Time Allowed: 3 Hours** | **Maximum Marks: 80**

### General Instructions

(i) इस प्रश्नपत्र में कुल **18** प्रश्न और चार खण्ड हैं।

(ii) खण्ड क: प्रश्न 1। खण्ड ख: प्रश्न 2–4। खण्ड ग: प्रश्न 5–8। खण्ड घ: प्रश्न 9–18।

(iii) प्रत्येक प्रश्न में दिए गए विशिष्ट निर्देशों और आंतरिक विकल्पों के अनुसार उत्तर दीजिए।

(iv) उत्तर लिखने से पहले प्रश्न की संख्या अवश्य लिखिए।

## Section A

**1.** अधोलिखितं गद्यांशं पठित्वा प्रदत्त-प्रश्नानाम् उत्तराणि संस्कृतेन लिखत।

गद्यांश: इह जगति विद्याया: महिमानं को न जानाति? विद्यया एव मानवेषु विवेक: जायते। विद्या सा एव सद्विद्या या विमुक्तये स्यात्। विद्या मनुष्याय विनयं ददाति। विनयात् मानव: पात्रताम् लभते। पात्रत्वात् धनं प्राप्नोति। धनात् धर्म: भवति तत: च सुखं लभते। वस्तुत: विद्याधनम् अन्येभ्य: धनेभ्य: श्रेष्ठं धनम् अस्ति। अन्यानि धनानि तु व्यये कृते क्षयं यान्ति परन्तु विद्याधनं व्यये कृते वर्धते। अन्यानि धनानि सञ्चयात् पुष्टतां वृद्धिं च यान्ति, परञ्च विद्याधनं सञ्चयात् अदानात् वा क्षयं याति। अत एव विद्याया: कोश: अपूर्व: अद्भुत: अस्ति। सत्यमेतद् यद् विद्या एव नर: देशे विदेशे च सर्वत्र यश: लभते । अत एव विद्याप्राप्तये सर्वथा प्रयत्नो विधेय: । उक्तं च - 'विद्याधनं सर्वधनप्रधानम्'।

(अ) एकपदेन उत्तरत (केवलं प्रश्नचतुष्टयम्, 1/2x4=2): (i) विद्या मनुष्याय किं ददाति? (ii) विनयात् क: पात्रताम् लभते? (iii) का या विमुक्तये स्यात्? (iv) किं व्यये कृते वर्धते? (v) विद्याधनं कदा क्षयं याति? (ब) पूर्णवाक्येन उत्तरत (केवलं प्रश्नद्वयम्, 2x2=4): (i) विद्याधनं केभ्य: श्रेष्ठं धनम् अस्ति? (ii) विद्यया नर: कुत्र यश: लभते? (iii) विद्याया: कोश: कीदृश: अस्ति? (स) यथानिर्देशम् उत्तरत (एकपदात्मकमुत्तरम्) (केवलं प्रश्नत्रयम्, 1x3=3): (i) 'सद् विद्या' इत्यनयो: पदयो: किं विशेषणपदम्? (ii) 'दु:खम्' अस्य विलोमपदं किं प्रयुक्तम्? (iii) 'सा एव सद् विद्या' अत्र 'सा' सर्वनामपदं कस्यै प्रयुक्तम्? (iv) 'ददाति' इति क्रियापदस्य कर्तृपदं किम्? (द) अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं संस्कृतेन लिखत। (1)

## Section B

**2.** भवत: नाम देवव्रत:। भवता संस्कृतनाटके श्रीरामस्य भूमिकाया: अभिनय: कृत: सर्वोत्तम-अभिनयस्य पुरस्कार: च प्राप्त:। तत् सूचयता भवता स्वपितरं प्रति लिखिते पत्रे मञ्जूषात: रिक्तस्थानि पूरयित्वा च पुन: पत्रं लिखत। (1/2x10=5)

विवेकानन्द छात्रावास:, नवदिल्लीत:, दिनाङ्क: ___। परमपूज्य पितृचरणा:। सादरं (i) ___। अहम् अत्र भवत: (ii) ___ स्वस्थ: अस्मि। मम (iii) ___ एका संस्कृतनाटक-प्रतियोगिता अभवत्। अहं तस्याम् (iv) ___ अभिनयं कृतवान्। (v) ___ सभां प्रविश्य अहं भगवत: शिवस्य (vi) ___ खण्डं कृत्वा सीतया सह विवाहं कृतवान्। तत्रागतेन (vii) ___ सह मम वार्तालापं श्रुत्वा सर्वै: दर्शकै: करतलवादनं कृतम्। अहं (viii) ___ अभिनेतु: (ix) ___ प्राप्तवान्। भवदीय: प्रिय: पुत्र: (x) ___।

मञ्जूषा: प्रणमामि, देवव्रत:, पुरस्कारं, परशुरामेण, धनु:, महाराजजनकस्य, श्रीरामस्य, आशीर्वादिन, विद्यालये, सर्वोत्कृष्टस्य।

**3.** मञ्जूषायां प्रदत्तशब्दानां सहायतया अधोलिखितायां लघुकथायां रिक्तस्थानानि पूरयित्वा कथां पुन: लिखत। (1/2x10=5)

अस्ति दाक्षिणात्ये जनपदे (i) ___ नाम नगरम्। तस्य समीपे एक: (ii) ___ आसीत्। तस्योपरि (iii) ___ वसति स्म। एकदा कश्चित् (iv) ___ तत्र आगच्छत्। स: (v) ___ अध: जालं प्रसार्य तस्योपरि च (vi) ___ क्षिपति। तण्डुलान् भक्षयितुम् आगता: (vii) ___ जाले बद्धा: अभवन्। सर्वे कपोता: मिलित्वा (viii) ___ सह उदपतन्। ते जालं नीत्वा स्वमित्रस्य (ix) ___ पार्श्वे अगच्छन्। मूषकराज: जालम् अकृन्तत् एवं कपोता: (x) ___ अभवन्।

मञ्जूषा: कपोता:, जालेन, मुक्त:, वारंगल, वटवृक्ष:, मूषकराजस्य, कपोतराज:, तण्डुलकणान्, व्याध:, वृक्षस्य।

**4.** 'परोपकार:' इति विषयमधिकृत्य पञ्चवाक्यमितम् अनुच्छेदं लिखत। (यदि मञ्जूषाप्रदत्तपदानां सहायता अपेक्षिता चेत् ग्रहीतव्या अन्यथा स्वयं चिन्तयित्वा स्वतन्त्ररूपेण लिखत।) (1x5=5)

मञ्जूषा: परेषां, पुण्याय, नद्य:, वृक्षा:, वहन्ति, दुग्धेनेव, फलन्ति, सज्जना:, गाव:, करणीय:, अस्माभि:, पोषयन्ति।

OR

**4.** अथवा/OR
अधोलिखितवाक्येषु केषाञ्चित् पञ्चवाक्यानां संस्कृतेन अनुवादं कुरुत। (1x5=5)

(i) एक धनी व्यक्ति, किसी शहर में रहता था । (ii) इस विद्यालय के दोनों ओर वृक्ष हैं । (iii) बूढ़ा धीरे-धीरे चलता है । (iv) हम ईश्वर की प्रार्थना करते हैं । (v) सत्यशील का हृदय साफ तथा निर्मल है । (vi) हिमालय में अनेक तीर्थ स्थान हैं । (vii) अध्यापक छात्रों को शिक्षा देते हैं ।
(i) A rich man lived in a city. (ii) There are trees on both sides of this school. (iii) An old man walks slowly. (iv) We pray to God. (v) Satyashil's heart is clear and pure. (vi) There are many holy places in the Himalayas. (vii) Teachers teach students.

## Section C

**5.** अधोलिखितवाक्येषु रेखाङ्कितपदानां सन्धिं सन्धिच्छेदं वा कुरुत। (केवलं प्रश्नषट्कम्, 1x6=6)

(i) मातु: परिवादं न श्रोतुमिच्छामि। (ii) सा च यजु: + विद्या। (iii) सुवर्णं नैव नादं करोति। (iv) आकारसदृशप्रज्ञ: प्रज्ञया सदृश + आगम:। (v) शोभां दधात्युषसि काञ्चनकाञ्चनीयम्। (vi) नास्ति कोऽपि अवकाश:। (vii) किं तावन्मे सा प्रतीक्षा। (viii) अहो शोभनं राजोद्यानम्।

**6.** अधोलिखितवाक्येषु रेखाङ्कितपदानां समासं विग्रहं वा कुरुत। (केवलं प्रश्नपञ्चकम्, 1x5=5)

(i) सा च द्विविधा विधिविवेचनी ब्रह्मनिर्दर्शनी। (ii) न ज्ञानम् चाभिजातस्य पार्थ संपदमासुरीम्। (iii) पतिपत्न्यौ त्रिवर्गं साधयत:। (iv) त्वं पत्यु: गृहं शीघ्रमेव गमिष्यसि। (v) अपराधेन सहितं मे वच: क्षन्तव्यम्। (vi) क्रियाविधिज्ञं व्यसनेष्वसक्तम्। (vii) सौम्य! विज्ञाप्यो वसुधाधिप:। (viii) इमानि चतुर्दश विद्यास्थानानि।

**7.** अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृतिप्रत्ययौ योजयत पृथक् वा कुरुत। (केवलं प्रश्नषट्कम्, 1x6=6)

(i) अनेन मणिना छन्द प्रणम्य ब हुशो नृप:। (ii) वत्सराज: राजभवनं गम्+क्त्वा राजानं प्राह। (iii) यस्या: शक्रसमो भर्ता मया पुत्रवती च या। (iv) धर्मान्न प्रमदितव्यम्। (v) भुशुण्डीं स्कन्धे निधाय निपुणं निरीक्षमाण:। (vi) जगत्याम् विद्या रूपवताम् अपेक्षया मानं लभते। (vii) भोजं रथे निवेश्य रात्रौ वनं नी+क्तवतु।

**8.** कोष्ठकप्रदत्तपदै: सह समुचितां विभक्तिं प्रयुज्य रिक्तस्थानपूर्तिं कुरुत। (केवलं प्रश्नत्रयम्, 1x3=3)

(i) हा धिक् ___ अविज्ञाय उपालभसे। (अस्मद्) (ii) आचार्येति पदं प्राप्य ___ जीवनकलां शिक्षयिष्यामि। (शिष्य) (iii) अहम् ___ राज्यं प्रयच्छामि। (पुत्र) (iv) न ___ अपि समं गता वसुमती। (एक)

## Section D

**9.** अधोलिखितं गद्यांशं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेनोत्तरत। (5)

गद्यांश: वत्सराजस्य इदं वचनमाकर्ण्य कुपितो राजा प्राह - त्वं मम सेवकोऽसि, मया यत्कथ्यते त्वया तद् विधेयम्। पुन: वत्सराज: राजाज्ञा पालनीयैवेति मत्वा तूष्णीं बभूव। अनन्तरम् अनिच्छन्नपि वत्सराज: भोजं रथे निवेश्य रात्रौ वनं नीतवान्। तत्र आत्मनो वधयोजनां ज्ञात्वा भोज: किमपि वत्सराजं कथितवान्। तद्वचनै: वैराग्यमापन्नो वत्सराज: तं न हतवान्, अपितु गृहमागत्य भोजं गृहाभ्यन्तरे भूमौ निक्षिप्य ररक्ष । पुन: कृत्रिमरूपेण भोजस्य मस्तकं कारयित्वा राजभवनं गत्वा वत्सराजो राजानं प्राह - श्रीमता यथादिष्टं तत्साधितमिति।

प्रश्ना: (अ) एकपदेन उत्तरत (केवलं प्रश्नद्वयम्, 1/2x2=1): (i) आत्मन: वधयोजनां क: ज्ञातवान्? (ii) का पालनीया एव? (iii) वत्सराज: कृत्रिमरूपेण कस्य मस्तकं कारितवान्? (ब) पूर्णवाक्येन उत्तरत (केवलं प्रश्नमेकम्, 2x1=2): (i) वत्सराज: भोजं रथे निवेश्य कुत्र नीतवान्? (ii) कुपितो राजा किं वत्सराजं प्राह? (स) यथानिर्देशम् उत्तरत (केवलं प्रश्नचतुष्टयम्, 1/2x4=2): (i) 'दास:' इत्यस्य समानार्थकपदं गद्यांशात् चित्वा लिखत। (ii) 'उल्लंघनीयैव' इत्यस्य विलोमपदं गद्यांशात् चित्वा लिखत। (iii) 'त्वं मम सेवकोऽसि।' अत्र 'त्वम्' इति सर्वनामपदं कस्मै प्रयुक्तम्? (iv) 'कथितवान्' इति क्रियापदस्य कर्तृपदं किं प्रयुक्तम्? (v) 'कुपितो राजा' अनयो: पदयो: विशेष्यपदं किम्?

**10.** अधोलिखितं पद्यांशं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेनोत्तरत। (5)

पद्यम्: 'स्वाधीनताऽऽर्यभुवि मूर्तिमती समाना राणाप्रताप-बलवीर्य विभासमाना। आटीकते समुपमा नहि यां सुशोचि: शाटीव सा जयति काचन हल्दिघाटी ।।'

प्रश्ना: (अ) एकपदेन उत्तरत (केवलं प्रश्नद्वयम्, 1/2x2=1): (i) आर्यभुवि स्वाधीनता का समाना? (ii) भारतभूमि: कस्य बलवीर्य विभासमाना? (iii) आर्यभुवि शाटीव का विराजते? (ब) पूर्णवाक्येन उत्तरत (केवलं प्रश्नमेकम्, 2x1=2): (i) मूर्तिमती हल्दिघाटी कथम् प्रतिभाति? (ii) हल्दिघाटी कीदृशी आटीकते? (स) यथानिर्देशम् उत्तरत (केवलं प्रश्नचतुष्टयम्, 1/2x4=2): (i) 'जयति' इति क्रियापदस्य कर्तृपदं किम्? (ii) 'यां सुशोचि:' अत्र 'याम्' इति सर्वनामपदं कस्यै प्रयुक्तम्? (iii) 'पराधीनता' इत्यस्य विलोमपदं श्लोकात् चित्वा लिखत। (iv) 'शाटीव हल्दिघाटी' अत्र किं विशेषणपदम्? (v) 'भूमौ' इति पदस्य समानार्थकपदं किं प्रयुक्तम्?

**11.** अधोलिखितं नाट्यांशं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेनोत्तरत। (5)

नाट्यांश: काञ्चुकीय: - परित्रायतां परित्रायतां कुमार:। राम: - आर्य! क: परित्रातव्य:? काञ्चुकीय: - महाराज। राम: - महाराज: इति। आर्य! ननु वक्तव्यम्। एक शरीर-संक्षिप्ता पृथिवी रक्षितव्येति। अथ कुत उत्पन्नोऽयं दोष:? काञ्चुकीय: - स्वजनात्। राम: - स्वजनादिति। हन्त! नास्ति प्रतीकार:। शरीरेऽरि: प्रहरति हृदये स्वजनस्तथा। कस्य स्वजनशब्दो मे लज्जामुत्पादयिष्यति ।।

प्रश्ना: (अ) एकपदेन उत्तरत (केवलं प्रश्नद्वयम्, 1/2x2=1): (i) कुमारस्य किं नाम? (ii) स्वजनात् क: उत्पन्नो जात:? (iii) शरीरे क: प्रहरति ? (ब) पूर्णवाक्येन उत्तरत (केवलं प्रश्नमेकम्, 2x1=2): (i) एकशरीरसंक्षिप्ता का रक्षितव्या? (ii) रामानुसारं कस्मात् प्रतीकार: नास्ति? (स) यथानिर्देशम् उत्तरत (केवलं प्रश्नचतुष्टयम्, 1/2x4=2): (i) 'पृथिवी रक्षितव्या' अनयो: पदयो: विशेष्यपदं किम्? (ii) 'मे' इति सर्वनामपदं कस्मै प्रयुक्तम्? (iii) 'भूमि' इति पदस्य पर्यायपदं किम् प्रयुक्तम्? (iv) 'रक्षति' इति शब्दस्य विलोमपदं किं प्रयुक्तम्? (v) 'उत्पादयिष्यति' इति क्रियापदस्य कर्तृपदं किम्?

**12-अ.** अधोलिखितस्य पद्यस्य भावार्थं मञ्जूषाप्रदत्तपदैः पूरयित्वा पुनः लिखत। (1/2x6=3)

'एकेनापि सुपुत्रेण विद्यायुक्तेन साधुना। आह्लादितं कुलं सर्वं यथा चन्द्रेण शर्वरी ।।'

भावार्थः आचार्य चाणक्यः (1)___ यत् (2)___ शीलस्वभावयुक्तेन अपि सुपात्रपुत्रेण एकेनापि (3)___ तथैव सम्पूर्णं (4)___ आनन्दितं भवति यथा (5)___ रात्रिः (6)___ भवति।

मञ्जूषा: पूर्णचन्द्रमसा, प्रदीप्ता, कथयति, कुलम्, सत्पुत्रेण, विद्यावता।

OR

**12-12अ.** अथवा/OR — प्रदत्त-भावार्थत्रयात् शुद्धं भावार्थं चित्वा लिखत।

'स पिता पितरस्तासां केवलं जन्महेतवः।' अस्य भावार्थः कतमः?

(A) पितरः तु जन्मदातारः भवन्ति।

(B) दिलीपः एव प्रजानां पोषणात् तासां पिता इवासीत्।

(C) प्रजानां पितरः तु केवलं जन्मनः कारणभूताः आसन्।

**12-12ब.** अथवा/OR — प्रदत्त-भावार्थत्रयात् शुद्धं भावार्थं चित्वा लिखत।

'प्रणवश्छन्दसामिव।' अस्य भावार्थः कतमः?

(A) छन्दसि प्रणवः भवति।

(B) छन्दसां प्रणवः इव श्रेष्ठः नृपः आसीत्।

(C) प्रणवः छन्द इव भवति।

**12-12स.** अथवा/OR — प्रदत्त-भावार्थत्रयात् शुद्धं भावार्थं चित्वा लिखत।

'वसुमती नूनं त्वया यास्यति।' अस्य भावार्थः कतमः?

(A) वसुमत्या सह त्वम् गमिष्यसि।

(B) इयं पृथिवी अपि त्वया सह गमिष्यति।

(C) अहो! मृत्युङ्गते त्वयि अवश्यमेव त्वया सह इयं पृथिवी अपि यास्यति।

**13-अ.** अधोलिखितश्लोकद्वयस्य प्रदत्तान्वये उचितपदैः रिक्तस्थानपूर्तिं कुरुत। (1/2x6=3)

'शोकादवचनाद् राज्ञा हस्तेनैव विसर्जितः। किमप्यभिमतं मन्ये मोहं च नृपतिर्गतः ।।' अन्वयः राज्ञा शोकात् अवचनात् (i)___ एव विसर्जितः (अहम्) मन्ये (ii)___ किमपि अभिमतं (iii)___ च गतः।

**13-ब.** 'सर्गः प्रतिसंहारः कल्पो मन्वन्तराणि वंशविधिः । जगतो यत्र निबद्धं तद्विज्ञेयं पुराणमिति ।।' अन्वयः यत्र जगतः वंशविधिः (i)___ प्रतिसंहारः, कल्पः (ii)___ निबद्धम् (तद्ग्रन्थम्) (iii)___ इति विज्ञेयम्।

OR

**13.** अथवा/OR
प्रश्नपत्रात् भिन्नं पाठ्यपुस्तकस्य श्लोकमेकं लिखित्वा तस्य भावार्थं लिखत। (3x1=3)

**14.** 'क' स्तम्भस्य वाक्यांशस्य 'ख' स्तम्भस्य वाक्यांशेन सह मेलनं कुरुत। (1/2x4=2)

कः (अ) लक्ष्म्याः रक्षार्थं। (ब) बली बलं वेत्ति। (स) ज्योत्स्ना तमः। (द) महाराजाशिववीरस्य।

खः (i) आज्ञां वयं शिरसा वहामः। (ii) सहचरी चपलेति चित्रम्। (iii) पत्न्याः सहयोगः अनिवार्यः। (iv) न वेत्ति निर्बलः।

**15-अ.** अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसङ्गानुसारं शुद्धम् उत्तरं चित्वा लिखत। (केवलं प्रश्नचतुष्टयम्)

'<u>स्वाध्यायात्</u> न प्रमदितव्यम्।' अत्र 'स्वाध्यायात्' इत्यस्य सार्थक: अर्थ: कतम:?

(A) स्वपठनकार्यात् (B) अध्यापनात्

(C) स्वविचारात्

**15-ब.** अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसङ्गानुसारं शुद्धम् उत्तरं चित्वा लिखत। (केवलं प्रश्नचतुष्टयम्)

'सत्याय <u>मितभाषिणाम्</u>।' अत्र 'मितभाषिणाम्' इत्यस्य सार्थक: अर्थ: कतम:?

(A) बहुसत्याय (B) अल्पभाषिणाम्

(C) बहुभाषिणाम्

**15-स.** अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसङ्गानुसारं शुद्धम् उत्तरं चित्वा लिखत। (केवलं प्रश्नचतुष्टयम्)

'<u>शिवप्रसादेन</u> स: जीवितो भविष्यति।' अत्र 'शिवप्रसादेन' इत्यस्य सार्थक: अर्थ: कतम:?

(A) भवताशिर्वदिन (B) शिवभवनेन

(C) शम्भुकृपया

**15-द.** अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसङ्गानुसारं शुद्धम् उत्तरं चित्वा लिखत। (केवलं प्रश्नचतुष्टयम्)

'विद्या ददाति विनयं अतएव एवं <u>भणसि</u>।' अत्र 'भणसि' इत्यस्य सार्थक: अर्थ: कतम:?

(A) वदति (B) वदसि

(C) गच्छसि

**16-अ.** भाग-II: सामान्य: संस्कृतसाहित्यपरिचय:।

अधोलिखितेषु कस्यापि एकस्य कवे: परिचयं संस्कृतेन लिखत। (1x3=3)

वाल्मीकि:, भर्तृहरि:, विष्णुशर्मा।

OR

**16-अ.** अथवा/OR
मञ्जूषाप्रदत्तपदानां साहाय्येन अधोलिखितवाक्येषु रिक्तस्थानपूर्तिं कुरुत। (1/2x6=3)

(i) प्रतिमानाटकम् ___ लिखितम्। (ii) नाटके ___ अर्थप्रकृतय: भवन्ति। (iii) नान्दी ___ प्रारम्भे भवति। (iv) चम्पू: ___ भवति। (v) मुद्राराक्षसस्य लेखक: ___ अस्ति। (vi) रामायणचम्पूकाव्यस्य लेखक: ___ अस्ति।

मञ्जूषा: नाटकस्य, गद्यपद्यमयम्, महाकविभासेन, पञ्च, भोज:, विशाखदत्त:।

**17.** कथा – आख्यायिका – रूपकस्य च विधानां मुख्यविशेषता: लिखत। (1x3=3)

**18.** खण्डकाव्यस्य महाकाव्यस्य वा चत्वारि वैशिष्ट्यानि लिखत। (1x4=4)

**- End of Question Paper -**